स्वभां स्थिरमोक्षलक्ष्मीं लक्ष्मीं स्वभावचपलां किमु कामयेथाः?। विद्याधनानि सदनानि गजाश्वभृत्या स्रक्चन्दनानि वनिताश्च नितान्तरम्याः। स्वर्गोऽप्यगम्यदिह नोद्यमभाजि पुंसि वाराणसी त्वसुलभाऽसुलभा विमुक्तिः। धात्रा धृतानि तुलया तुलनामवैतुं वैकुण्ठसुखप्रभुवनानि च काशिका च। तान्युद्ययुर्लघुतया न्यगि यं गुरुत्वात् तस्थौ पुरीह पुरुषार्थचतुष्टयस्य। काशीपुरीमधिवसन् हि नरोऽनरोऽपि ह्यारोप्यमाण इह मानवइहैकरुद्रः। नानोपसर्गजनिसर्गजदुःखभारैः कर्म्मापनुद्य स विशेत् परमेशधाम्नि। स्थिरापायं कायं जननमरणक्लेशनिलयं विहायास्थां काश्यामहह परिगृह्णीत न कुतः। वपुस्तेजोरूपं स्थिरतरपदानन्दसदनं विमूढोऽसौ जन्तुः स्फुटितमिव काश्यां विनिमयन्। अहो लोकः शोकं किमिह सहते हन्त हतधीर्विपद्भारैः सारैर्नियतनिधनैर्ध्वंसितधनैः। क्षितौ सत्यां काश्यां कथयति शिवो यत्र निधने श्रुतौ किञ्चिद्भूयः प्रविशति न येनोदरदरीम्। काशिवासिनि जने वनेचरे द्विविभुज्यपि समीरभोजने। स्वैरचारिणि जितेन्द्रियेऽप्यहो काशिवासिपुरुषे विशिष्टता नास्तीह दुष्कृतकृतां सुकृतात्मनां वा काचिद्विशेषगतिरन्तकृता हि काश्याम्। वीजानि कर्म्मजनितानि यदूषरायां नाङ्कुरयन्ति हरदृग्ज्वलितानि तेषाम्। मशका मसका वकाः शुकाः कलविङ्काश्च वृकाः सजम्बुकाः। तुरगोरगवानरा नरा गिरिजे! काशिमृताः गतामृताः। अरुद्ररुद्राक्षफणीन्द्रभूषणा त्रिपुण्ड्रचन्द्रार्द्धधरा धराकृताः। निरन्तरं काशिनिवासिनो जना गिरीन्द्रजे! पारिषदा मता मम। यावन्त एव निवसन्ति च जन्तवोऽत्र काश्यां जलस्थलचराण्डजजम्बुकाद्याः। तावन्त एव मदनुग्रहरुद्रदेहा देहावसानमधिगम्य मयि प्रविष्टाः। ये तु वर्षेषवो रुद्रा दिवि! देवि! प्रकीर्त्तिताः। वातेषवोऽन्तरीक्षे ये ये भुव्यन्नेषवः प्रिये!। रुद्रा दश दश प्राच्यवाचीप्रत्यगुदक्स्थिताः। ऊर्द्ध्वदिक्स्थाश्च ये रुद्राः पठ्यन्ते वेदवादिभिः। असंख्याताः सहस्राणि ये रुद्रा अधिभूतले। तत्सर्वेभ्योऽधिकाः काश्यां जन्तवो रुद्ररूपिणः। रुद्रावासस्ततः प्रोक्तमविमुक्तं घटोद्भव!। तस्मादभ्यर्च्य काशीस्थान् वर्णान् वर्णेतराश्रमान्। श्रद्धयेश्वरबुद्ध्या च रुद्रार्च्चाफलभाक् नरः। श्मशब्देन शवः प्रोक्तः शानं शयनमुच्यते। निर्वचन्ति श्मशानार्थं मुने! शब्दार्थकोविदाः। महान्त्यपि च भूतानि प्रलये समुपस्थिते। शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततो महत्। अप्सु भूरिह लये लयं व्रजेदापश्चौर्व्ववदनोग्रकन्दरे। मातरिश्वनि महातनूनपाद्व्योम्नि संचरति वै सदागतिः। व्योम चापि लयमेत्यहङ्कृतौ सापि षोड़शविकारसंयुता। लीयते महति बुद्धिसंज्ञके हा महान् प्रकृतिमध्यगो भवेत्। सा गुणत्रयमयी च निर्गुणं तं पुमांसमवगुह्य तिष्ठति। पञ्चविंशतितमः परः पुमान् देहगेहपतिरेष जीवकः। प्राकृतः प्रलय एष उच्यते हंसयानहरिरुद्रवर्जितः। कालमूर्त्तिरथ तञ्च पूरुषं हेलया कलयतीश्वरः परः। स वै महाविष्णुरितीर्यते बुधैस्तं वै महादेवमुदाहरन्ति। सोऽन्तादिमध्यैः परिवर्जितः शिवः स श्रीपतिः सोऽपि हि पार्वतीपतिः। दैनन्दिनेऽथ प्रलये त्रिशूलकोटौ समुत्क्षिप्य पुरीं हरः स्वाम्। बिभर्त्ति संवर्त्तमहास्थिभूषणस्ततो हि काशी कलिकालवर्जिता। स्कन्द उवाच। वाराणसीति काशीति रुद्रावास इति द्विज!। महाश्मशानमित्येवं प्रोक्तमानन्दकाननम्। इति देवीपुरः प्रोक्तं देवदेवेन शम्भुना। यथा विष्णौ पुराख्यातं तथैवच मया श्रुतम्"।

सा च सप्तमोक्षपुर्य्यन्तर्गता। "अयोध्या मथुरा माया काशी काञ्चिरवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः। काशी०। "अन्यानि यानि तीर्थानि काशीप्राप्तिकराणि च। काशीं प्राप्यैव मोक्षन्ते नान्यथा कल्पकोटिभिः" भा०टी०नीलकण्ठधृतम् "तत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूय मोक्षीभवति" श्रुतिः। तेन काशीमृतानां जन्तूनां शिवसकाशात्तत्त्वज्ञानलाभेन तत्क्षणात् मुक्तिः तत्त्वज्ञानस्य प्रारब्धेतरसर्व्वकर्म्मनाशकत्वात् तेनैव सर्वकर्म्मनाशः। सञ्चितकर्म्मणां कायव्यूहेन भोगात् परिक्षयणमित्यन्ये। इतरतीर्थमृतानां तु ब्रह्मादिलोकप्राप्तौ तत्र श्रवणमननाद्यपेक्षेति भेदः।

"सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत्"। काशी० "कदा काश्यां गमिष्यामि कदा द्रक्ष्यामि शङ्करम्। इति ब्रुवाणः सततं काशीवासफलं लभेत्। २ काशीस्थदेवीमूर्त्तिभेदे च "विश्वेशं माधवं दुण्ढिं दण्डपाणिञ्च भैरवम्। वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्। स्वार्थे ङीप्। ३ स्वल्पकाशतृणे भरतः